संस्कृत वार्ता:

दिनाङ्क : 20/08/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-जापान-देशाभ्यां रक्षा-सहभागिता दृढीकर्तुं सहमतिः प्रकटिता । उभावपि देशौ सामुद्रिक-सुरक्षा-सहयोगाय च व्यवस्था-सम्मति-पत्रे हस्ताक्षरम् कृतवन्तौ।
- गृहमन्त्री अमितशाहः अन्ताराज्यिक-विवादान् सुरक्षा-विकास-विषयाञ्च चर्चयितुं तमिलनाडु-राज्यस्य कोवलम्-नगरे एकत्रिंशत्तमस्य दक्षिण-क्षेत्रीय-परिषदुवेशनस्य अध्यक्षताम् अकरोत् ।
- झारखण्ड-उच्च-न्यायालयः जेपीएससी-नियुक्तीनां खाद्य-सुरक्षा-अधिकारि-चयनस्य च निरस्तीकरण-आदेशे स्थगनादेशम् प्रायच्छत् ।
- पाक-अधिकृत-जम्मू-कश्मीरे प्रतिरोध-प्रदर्शनानि तीव्रीभूतानि, पाक-शासनतन्त्रं च जनाक्रोशेन वर्तते त्रस्तम्।
- भारतस्य त्रीसा जॉली अथ गायत्री गोपीचन्दः च बीडब्ल्यूएफ्-विश्वस्पर्धायाः महिलायुगलद्वन्द्वे प्रागुपान्त्यचरणे प्रविष्टवत्यौ।

-----------------------------------------

<u>रक्षामन्त्री-जापानसम्मेलनम्</u>

नवदिल्ल्याम् अद्य भारत-जापान-रक्षामन्त्रि-स्तरीयोपवेशनं सम्पन्नम्। अस्योपवेशनस्य सहाध्यक्षतां भारतस्य रक्षामन्त्री राजनाथ-सिंहः अथ च तस्य जापानी-समकक्षीयः शिञ्जीरो कोइजुमी अकुर्वताम्। अस्मिन् उपवेशने सामुद्रिक-सुरक्षायाः सुदृढीकरणं, मेक इन इण्डिया इत्यस्यान्तर्गतं रक्षा-प्रौद्योगिक्याः, सहैव रणनीतिक-विश्वासस्य च विस्तारः इति प्रमुख-विषयेषु गभीरा चर्चा सञ्जाता। उभौ मन्त्रिणौ सामुद्रिक-सुरक्षा-सहयोगाय एकस्मिन् व्यवस्था-ज्ञापनसन्धौ हस्ताक्षरम् अकुरुताम्। स्वकीये भाषणे रक्षामन्त्री राजनाथ-सिंहः प्रावोचत् यत् एशिया-महाद्वीपस्य द्वौ लोकतान्त्रिक-देशौ भारत-जापानौ, क्षेत्रे शान्तिं, स्थिरतां, समृद्धिं च स्थापयितुं महत्तरम् उत्तरदायित्वं निर्वहतः । श्रीसिंहः प्रतिपादितवान् यत् सामुद्रिक-मार्ग-सुरक्षायां समाह्वानानि वर्धन्ते, अतः नौपरिवहन-स्वातन्त्र्यं, वायुयान-सञ्चालन-स्वातन्त्र्यं, अथ

च अबाधित-वैध-वाणिज्यं सुनिश्चेतुं क्रियमाणाः प्रयासाः केवलम् आर्थिक-आवश्यकता एव न अपितु एकम् अनिवार्यं रणनीतिक-दायित्वम् अपि अस्ति। सः प्रतिपादितवान् यत् हिन्द-महासागरस्य प्रशान्त-महासागरस्य च सुरक्षा परस्परं दृढतया संलग्ना वर्तते। मन्त्रिणा स्पष्टीकृतं यत् भारतस्य महासागरीय-दृष्टौ सहैव जापानस्य मुक्त-एवं-प्रकट-हिन्द-प्रशान्त-उपक्रमे च निकट-समन्वयः सम्प्रति पूर्वस्मादपि अधिकं आवश्यकं जातम्।

जापानी-रक्षामन्त्री कोइजुमी-महोदयः कुमामोटो-प्रान्ते आगतेन भूकम्पेन प्रभावितान् जनानालक्ष्य भारतेन प्रकटीकृतां संवेदनां प्रशंसितवान्। सः जापानी-सामुद्रिक-आत्मरक्षा-बलस्य पोते दुरापन्नायां आपत्कालीन-चिकित्सा-स्थितौ भारतीय-नौसेनायाः साहायतायै कार्त्तज्ञं प्राकटयत्। अस्य वर्षस्य जुलाई-मासे द्वयोः देशयोः शीर्ष-नेतृभ्यां निस्सारितस्य संयुक्त-वक्तव्यस्य स्मरणं कुर्वन्तौ, द्वावपि मन्त्रिणौ मुक्त-तथा-प्रकट-हिन्द-प्रशान्त-क्षेत्रस्य निर्माणाय रक्षा-सहयोगं सुदृढीकर्तुं स्वसङ्कल्पं पुनरुच्चारितवन्तौ।

---

<u>अमितशाह-चेन्नै</u>

चेन्नै-नगरस्य समीपे महाबलीपुरम्-नगरे केन्द्रीय-गृहमन्त्रिणः अमितशाहस्य अध्यक्षतायां एकत्रिंशत्तमं दक्षिण-क्षेत्रीय-परिषदुपवेशनं सम्पन्नम्। अस्मिन् उपवेशने मुख्यमन्त्रिणः उच्चाधिकारिणश्च क्षेत्रस्य प्रगति-विकास-सम्बद्धेषु विषयेषु विस्तृतरूपेण विचार-विमर्शम् अकुर्वन्। उपवेशने तमिलनाडु-राज्यस्य मुख्यमन्त्री जोसेफ विजयः, कर्णाटकस्य मुख्यमन्त्री डी.के. शिवकुमारः, केरलस्य मुख्यमन्त्री सतीशनः, तेलङ्गानायाः उप-मुख्यमन्त्री मल्लू भट्टी विक्रमार्कः, सहैव आन्ध्रप्रदेशस्य मुख्यमन्त्री चन्द्रबाबू नायडू इत्येते भागम् अगृह्णन्। एतैः सह पुदुच्चेरी-राज्यस्य उप-राज्यपालः, अण्डमान-निकोबार-द्वीपसमूहस्य उप-राज्यपालः, लक्षद्वीपस्य प्रशासकः, अथ च विविध-मन्त्रालयानां वरिष्ठाधिकारिणः अपि उपस्थिताः आसन्। उपवेशने उपस्थिताः सदस्याः स्वास्थ्य-निधि-वितरणं, आधारभूत-संरचना, पर्यावरण-संरक्षणं, अथ च क्षेत्रीय-सुरक्षा-सम्बद्धेषु विषयेषु सहकारि-सङ्घीयतायाः महत्त्वे बलं दत्तवन्तः। अस्मिन् उपवेशने बहुषु महत्त्वपूर्ण-विषयेषु गभीरा चर्चा अभवत्, उपवेशनस्य परिणामेषु प्रतिभागिनः स्वकीय-सञ्चार-माध्यमेषु सन्तोषं प्राकटयन्।

------------------------------------------

## शाह्-वन्देमातरम्

केन्द्रीय-गृहमन्त्री अमितशाहः वन्दे मातरम् इति राष्ट्रिय-गीतस्य सम्पूर्ण-गानस्य स्थाने केवलं पद्य-द्वयस्य गान-सन्दर्भे काङ्ग्रेस-कार्यसमित्याः निर्णयस्य तीव्रां निन्दां कृतवान्। वार्ताहरैः सह संलपन् श्रीशाहः अकथयत् यत् एषः निर्णयः संसदा निर्मितस्य विधेः प्रत्यक्षम् उल्लङ्घनं अथ च राष्ट्र-विरोधि-कृत्यं वर्तते। गृहमन्त्री प्रतिपादितवान् यत् सप्तत्रिंशदधिक-एकोनविंशति-शततमे वर्षे काङ्ग्रेस-पक्षेण तुष्टीकरणार्थं वन्दे मातरम्-गीतं भाग-द्वये विभक्तम् । श्रीशाहः आरोपितवान् यत् राहुल-गान्धिनः नेतृत्वे काङ्ग्रेस-दलम् पुनः एकवारं तुष्टीकरणस्य मार्गम् अनुसरति।

------------------------------------------

## झारखण्ड-न्यायालयः

झारखण्ड-उच्च-न्यायालयः एकादशतः त्रयोदश-जेपीएससी सिविल-सेवा-परीक्षायाः अथ च खाद्य-सुरक्षा-अधिकारि-नियुक्तेः निरस्तीकरण-सम्बन्धे राज्य-सर्वकारस्य अधिसूचनायां अग्रिम-आदेश-पर्यन्तं स्थगनादेशं प्रायच्छत्। न्यायमूर्तिना दीपक-रोशनेन याचिकानां श्रवणावसरे स्पष्टीकृतं यत् विधि-प्रक्रियां नैसर्गिक-न्याय-सिद्धान्तान् च उल्लङ्घ्य पूर्वं नियुक्ताः अधिकारिणः पदात् निष्कासयितुं न शक्यन्ते। न्यायालयेन सर्वकारः सहैव झारखण्ड-लोकसेवा-आयोगः आगामि-वादश्रवणाय सितम्बर-मासस्य पञ्चदशदिनाङ्कं यावत् स्व-प्रतिवचनं दातुम् आदिष्टौ। उल्लेखनीयं वर्तते यत् सीआईडी-अन्वेषणस्य टीडीपीएल-संस्थायाः भूमिकायाश्च आधारेण सर्वकारेण द्वाविंशतिः परीक्षाः निरस्तीकृताः ।

------------------------------------------

## जम्मू-अन्वेषणम्

जम्मू-कश्मीरस्य कठुआ-जनपदस्य सीमा-क्षेत्रेषु सन्दिग्ध-व्यक्तीनां गमनागमनस्य सूचनां प्राप्य सुरक्षा-बलैः अद्य सघनम् अन्वेषण-अभियानम् प्रारब्धम् । आकाशवाण्याः जम्मू-संवाददातृ-वृत्तानुसारम् एतत् अभियानम् उधमपुर-कठुआ-सीमवर्तिषु बिलावर-क्षेत्रस्य वन-भागेषु चालितम् ।

स्थानीय-जनानाम् अनुसारं बुधवासरे चिररात्रौ बिलावर-क्षेत्रस्य एकस्मिन् ग्रामे अज्ञात-व्यक्तिभिः कस्यचित् गृहस्य द्वारं शब्दापितम्। परिवार-जनैः द्वारं न उद्घाटितम्, किन्तु परेद्युः प्रातः तैः दृष्टं यत् गृहे स्थापितं खाद्य-द्रव्यं विलुप्तम् आसीत्। अनेन केचन अज्ञात-जनाः गृहे प्रविष्टाः इति शङ्का समुत्पन्ना ।

-----------------------------------------

## पीओजेके - विरोधप्रदर्शनानि

पाकिस्तान-अधिकृत-जम्मू-कश्मीरे निवसन्तः जनाः सम्पूर्णे क्षेत्रे विरोधप्रदर्शनानि तीव्रं कृतवन्तः। अनेन पाकिस्तानस्य शासनव्यवस्थायाः वास्तविकता पुनः प्रकाशिता।

पीओजेके-इत्यस्मिन् क्षेत्रे विरोधप्रदर्शनानां विस्तारः निरन्तरं वर्धते, येन इस्लामाबादस्य तत् कथनं निरस्तं भवति यत् अशान्तिः केवलं रावलकोट्-क्षेत्रे एव सीमिता अस्ति। JAAC इत्यनया कार्यसमित्या इस्लामाबादस्य तत् कथनं निराकृत्य कथितं यत् विरोधप्रदर्शनानि अधुना सम्पूर्णे अधिकृतक्षेत्रे प्रसृतानि सन्ति।

पाकिस्तानस्य शासनव्यवस्थया इतः पूर्वं पीओजेके इत्यस्मिन् क्षेत्रे एतादृशस्य व्यापकस्य विरोधस्य अनुभवः न कृतः। अशान्तेः व्यापकता भौगोलिकविस्तारश्च पाकिस्तानस्य शासनव्यवस्थायै उद्वेगस्य कारणे अभवताम्।

-----------------------------------------

## बीडब्ल्यूएफ् - विश्वस्पर्धा

बैड्मिण्टन्-क्रीडायां, भारतस्य महिलायुगल-क्रीडिके त्रीसा जॉली अथ गायत्री गोपीचन्दः च नवदिल्ल्याम् आयोजितायां बीडब्ल्यूएफ्-विश्वस्पर्धायाः प्रागुपान्त्यचरणे प्रविष्टवत्यौ। भारतीययुगलेन उत्कृष्टं प्रदर्शनं कृत्वा जापानदेशस्य सप्तमक्रमाङ्कितं रिन् इवाङ्गा अथ की नाकानिशी चेत्येतयोः युगलं द्वयोः स्पर्धयोः एकविंशतिः - षोडश तथा एकविंशतिः - द्वादश इति अङ्कान्तरालेन पराजितम्।

।। इति वार्ताः ।।